तीक्ष्णकण्टका, स्त्री, (तीक्ष्णं कण्टकं यस्याः ।) कन्थारीवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकन्दः, पुं, (तीक्ष्णः कन्दोऽधोगेण्डुकोऽस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥

तीक्ष्णकर्म्मा, [न्] त्रि, (तीक्ष्णं कर्म्मास्य ।) तीव्रकर्म्मा । तत्पर्य्यायः । आयःशूलिकः २ । इति त्रिकाण्डशेषः ॥

तीक्ष्णकल्कः, पुं, (तीक्ष्णः कल्को यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णकान्ता, स्त्री, (तीक्ष्णा उग्रा कान्ता कमनीया च ।) मङ्गलचण्डिकाया रूपभेदः । यथा,—

"पीठे दिक्करवासिन्या द्विरूपा रमते शिवा ।
तीक्ष्णकान्ताह्वया लिका योग्यतारा प्रकीर्त्तिता ॥
पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका ।
तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं नृप ! ॥
कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा ।
तेन रूपेण तां देवीं सततं परिपूजयेत् ॥
अङ्गाङ्गिमन्त्रौ रूपञ्च तस्याः प्राक् प्रतिपादितम् ।
त्रिकोणं मण्डलं चास्याः कर्त्तव्यं मन्त्रपूर्ब्बकम् ॥
आदौ रेखे ततः पश्चात् सुरेखेति पदं ततः ।
तथा पदं चाधिगत्य तिष्ठन्त्विति पदं ततः ॥
मण्डलन्यासमन्त्रोऽयं तीक्ष्णायाः परिकीर्त्तितः ।
नव त्रिपुरदेवादियमवेतालदुर्द्दराः ॥
गणाश्मेऽत्यन्तकान्ता द्वारपालाः प्रकीर्त्तिताः ।
एतांस्तु पूजयेत् सम्यक् मण्डलस्याष्टदिक्षु वै ॥
आदौ सम्बोधनं कृत्वा वज्रपुष्पं ततः परम् ।
वह्निजाया ततः पश्चात् मन्त्रमेषां प्रकीर्त्तितम् ॥
पात्रोपकरणादीनां स्थानन्यासस्य सर्व्वतः ।
सर्व्वमुत्तरतन्त्रोक्तं ग्राह्यं रूपद्वयेऽपि च ॥
चामुण्डा च कराला च सुभगा भीषणा भगा ।
विकटेति च योगिन्यः प्रोक्तास्तस्यास्तु भूपते ! ॥
हे भगवत्येकजटे विद्महे पदमन्ततः ।
विकटदंष्ट्रे धीमहीति तन्नस्तारे प्रचोदयात् ॥
एषा तु तीक्ष्णा गायत्री पीठदेव्याः प्रकीर्त्तिता ।
निर्म्माल्यधारिणी चास्या देवी विकटचण्डिका ॥
माला तु स्फटिकमयी प्रोक्ता रुद्राक्षसम्भवापि वा ।
विशेष एष देव्यास्तु पूजने परिकीर्त्तितः ॥
उपचारादिकं कृत्यं बलिदानं जपादिकम् ।
सर्व्वन्तु पूर्ब्बवद्ग्राह्यं कामाख्यापूजने यथा ॥
पानेषु मदिरा शस्ता नरो बलिषु पार्थिव ! ।
मोदको नारिकेलञ्च मांसं व्यञ्जनमेव च ॥
नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

तीक्ष्णगन्धः, पुं, (तीक्ष्णः प्रचण्डो गन्धो यस्य ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥ रक्ततुलसी । इति रत्नमाला ॥ कुन्दुरुनामगन्धद्रव्यम् । इति जटाधरः ॥

तीक्ष्णगन्धकः, पुं, (तीक्ष्णो गन्धोऽस्य । "शेषात् विभाषा ।" ५ । ४ । १५४ । इति कप् ।) शोभाञ्जनवृक्षः । इत्यमरः । २ । ४ । ३१ ॥

तीक्ष्णगन्धा, स्त्री, (तीक्ष्ण उग्रो गन्धो यस्याः ।) श्वेतवचा । कन्थारी । राजिका । इति राजनिर्घण्टः ॥ (पर्य्याया यथा,—

"राजी तु राजिका तीक्ष्णगन्धा कुञ्जनिकासुरी ।
क्षवः क्षुताभिजनकः कृमिकस्तत्कृष्णसर्षपः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

वचा । इति मेदिनी । घे, ४६ ॥ जीवन्ती । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये ।

"उग्रा कुष्ठं तीक्ष्णगन्धा विड़ङ्गं
श्रेष्ठं नित्यं चावपीड़े करञ्जम् ॥")

सूक्ष्मैला । इति रत्नमाला ॥

तीक्ष्णतण्डुला, स्त्री, (तीक्ष्णास्तण्डुला यस्याः ।) पिप्पली इति रत्नमाला ॥ (अस्याः पर्य्याया यथा,

"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

तीक्ष्णतैलं, क्ली, (तीक्ष्णमुग्रं तैलं स्नेहो यस्य ।) सर्ज्जरसः । स्नुहीक्षीरम् । सुरा । इति शब्दरत्नावली ॥

तीक्ष्णदंष्ट्रः, पुं, (तीक्ष्णा दंष्ट्रा यस्य ।) व्याघ्रः । इति राजनिर्घण्टः ॥

तीक्ष्णपत्रः, पुं, (तीक्ष्णानि पत्राणि यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णपुष्पं, क्ली, (तीक्ष्णानि पुष्पानि यस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

तीक्ष्णपुष्पा, स्त्री, (तीक्ष्णं पुष्पं यस्याः ।) केतकी । इति राजनिर्घण्टः ॥

तीक्ष्णफलः, पुं, (तीक्ष्णं फलं यस्य ।) तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

तीक्ष्णमूलः, पुं, (तीक्ष्णं मूलमस्य ।) शिग्रुः । कुलञ्जनः । इति राजनिर्घण्टः ॥ (शिग्रुशब्दे विवृतिरस्य ज्ञातव्या ॥)

तीक्ष्णरसः, पुं, (तीक्ष्णो रसोऽस्य ।) यवक्षारः । इति रत्नमाला ॥

तीक्ष्णशूकः, पुं, (तीक्ष्णः शूकोऽग्रभागो यस्य ।) यवः । इति हेमचन्द्रः । ४ । २३६ ॥

तीक्ष्णसारा, स्त्री, (तीक्ष्णः कठिनः सारो यस्याः ।) शिंशपा । इति राजनिर्घण्टः ॥

तीक्ष्णा, स्त्री, (तीक्ष्ण + टाप् ।) वचा । सर्पकङ्कालिकावृक्षः । इति रत्नमाला ॥ कपिकच्छूः । महाज्योतिष्मती । अत्यम्लपर्णी । इति जटाधरः ॥

तीक्ष्णायसं, क्ली, (अय एव आयसम् । तीक्ष्णञ्च तत् आयसञ्चेति ।) लोहविशेषः । तीखा इति इस्पात इति च भाषा ॥ तत्पर्य्यायः । लोहम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डा ५ पिण्डायसम् ६ शठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ मुण्डितम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५ । अस्य गुणाः । रूक्षत्वम् । उष्णत्वम् । तिक्तत्वम् । वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम् । तीक्ष्णत्वम् । मुण्डलोहाधिकत्वञ्च । इति राजनिर्घण्टः ॥ (व्यवहारोऽस्य यथा, रसेन्द्रसारसंग्रहे शूलाधिकारे त्रिफलालौहे ॥

"तीक्ष्णायश्चूर्णसंयुक्तं त्रिफला चूर्णमुत्तमम् ।
क्षीरेण पाययेद्धीमान् सद्यः शूलनिवारणम् ॥")

तीम, य क्लेदने । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) य, तीम्यति तितीम । क्लेदनमार्द्रीभावः । इति दुर्गादासः ॥

तीर, त् क कर्म्मणां समाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) कर्म्मणामिति स्पष्टार्थः । अतितीरत् व्रतं लोकः समापितवानित्यर्थः । इति दुर्गादासः ॥

तीरं, क्ली, (तीरयति समापयति नद्यादिकमिति । तीर + अच् ।) नदीकूलम् । इत्यमरः ।१।१०।७॥ गङ्गातीरं यथा,—

"सार्द्धहस्तशतं यावत् गर्भतस्तीरमुच्यते ।
भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् ।
तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

शायकः । इति त्रिकाण्डशेषः ॥

तीरः, पुं, (तीरयतीति । तीर + पचाद्यच् ।) त्रपु । इति मेदिनी । रे, ४५ ॥

तीरभुक्तिः, पुं, (तीरे भुक्तिरस्य ।) देशविशेषः । तीरहोत् इति भाषा ॥ तत्पर्य्यायः । निच्छविः २ विदेहः ३ । इति त्रिकाण्डशेषः ॥

तीरितं, क्ली, (तीर कर्म्मणां समाप्तौ + भावे क्तः ।) कर्म्मणां समाप्तिः । इति व्याकरणम् ॥

तीर्णः, त्रि, (तॄ प्लवनतरणयोः + कर्त्तरि क्तः । उत्तीर्णः । (यथा, वह्निपुराणे कन्यादाननामाध्याये ।

"तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥")

अभिभूतः । प्लुतः । (तॄ + कर्म्मणि क्तः । कृतोत्तरणः । यथा, महाभारते । १ । १ । १६२ ।

"सत्यां तीर्णां शत्रुमध्ये च तेन
तदा नाशंसे विजयाय सञ्जय ! ॥")

तीर्णपदी, तालमूली । इति शब्दचन्द्रिका ॥

तीर्थं, क्ली, (तरति पापादिकं यस्मात् । तॄ + "पातॄतुदिवचीति ।" उणां । २ । ७ । इति थक् ।) पुण्यस्थानादि । तीर्थतोयस्य स्नाने पुण्यत्वं यथा,—

"नदीदेवनिखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
निपानादुद्धृतं पुण्यं ततः प्रस्रवणादिकम् ।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते ॥
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम् ॥"
इत्यादौ वह्निपुराणे स्नानविधिर्नाम ४ अध्यायः॥

जलसमीपस्थारत्निमात्रस्थानम् । यथा, आदित्यपुराणे ।

"अरत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते ।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत् ॥